# तर्कामृतम् ।

महामहोपाध्याय
श्रीजगदीशभट्टाचार्य्यकृतम् ।

पण्डितकुलपतिना,
वि, ए, उपाधिधारिणा
श्रीमज्जीवानन्द-विद्यासागर-भट्टाचार्य्यकृत-
सङ्क्षिप्तटिप्पनीसमेतम् ।

तदात्मजाभ्यां
पण्डित-श्रीमदाशुबोधविद्याभूषण-
पण्डित-श्रीमन्नित्यबोधविद्यारत्नाभ्यां
संस्कृतं प्रकाशितञ्च ।

तृतीय-संस्करणम् ।

कलिकातानगर्य्याम्
वाचस्पत्ययन्त्रे
मुद्रितम् ।

ई १९२८ ।

सर्व्वं स्वत्व संरक्षितम् ।

मूल्यं रौप्यकपादम् ।

प्रकाशक—
पण्डित-श्रीआशुबोध-विद्याभूषण
तथा।
पण्डित श्रीनित्यबोध-विद्यारत्न।

प्राप्तिस्थान—
२ नं०, रमानाथ मजुम्दार ष्ट्रीट्
आम्हार्ष्ट ष्ट्रीट् पोष्ट अफिस, कलिकाता।

प्रिण्टर—वि, वि, मुखर्जी।
२ नं०, रमानाथ मजुम्दार ष्ट्रीट्, कलिकाता।

# तर्कामृतम् ।

ब्रह्माद्या निखिलार्चिताखिलदशसन्दोहाः सदाऽभीष्टदा
अज्ञानप्रशमाय यत्र मनसो वृत्तिं समस्तां दधुः ।
श्रीविष्णोश्चरणाम्बुजं भवभयध्वंसैकबीजं परं
हृत्पद्मे विनिधाय तन्निरुपमं तर्कामृतं तन्यते ॥ १ ॥

अथ श्रुतिः श्रूयते,—“आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः—” ( वृह० उप० २ अध्या० ४ ब्रा० ५ मन्त्रः ) इति ; अस्यार्थः,—मुमुक्षुणा आत्मा द्रष्टव्यः, मुमुक्षोरात्मदर्शनमिष्टसाधनमिति यावत् । आत्मदर्शनोपायः कः ? इत्यत्राह—‘श्रोतव्यः’ इत्यादि, तेन आर्थक्रमेण शब्दक्रमस्त्यक्तो भवति (१), ‘अग्निहोत्रं जुहोति’ ‘यवागूं पचति’ इत्यादिवत् ; तथा च श्रवण-मनन-निदिध्यासनानि तत्त्वज्ञानजनकानीत्युक्तं भवति । अत्र श्रुतितः कृतात्मश्रवणस्य मननेऽधिकारः, मननञ्च आत्मन इतरभिन्नत्वेनानुमानं (२), तच्च भेदप्रतियोगीतरज्ञानसाध्यं (३), तथाचेतरदेव कियत् ? इत्येतदर्थं पदार्थनिरूपणम् ।

सङ्क्षेपतः पदार्थो द्विविधः (४), भावोऽभावश्च ; भावः

---

(१) कार्य्यस्य कारणोत्तरभावित्वात् ।

(२) आत्मा इतरेभ्यो भिद्यते आत्मत्ववत्त्वात्, यत् इतरेभ्यो न भिद्यते, न तत् आत्मत्ववत् यथा घटादि न चायं तथा ।

(३) अभावज्ञाने प्रतियोगिज्ञानस्य हेतुत्वादिति भावः ।

(४) अवान्तरविभाजकोपाधिद्वयविशिष्टः ।

षड्विधः,—द्रव्य-गुण-कर्म सामान्य विशेष-समवायभेदात्। तत्र द्रव्यत्व-गुणत्व कर्मत्वानि जातय (५), सामान्यत्वादीनि उपाधय। द्रव्याणि नव,—पृथिव्यप्तेजोवाय्वाकाशकालदिगात्म-मनांसि। आकाशत्व-कालत्व-दिक्त्वानि उपाधय (६), अन्यानि जातयः।

तत्र रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभाग-परत्वापरत्वगुरुत्वद्रवत्वसंस्काराश्चतुर्दश गुणाः पृथिव्याम्। तत्रैव गन्ध विहाय स्नेह विनियोज्य चतुर्दश गुणाः जलस्य। रूप-स्पर्श सङ्ख्या-परिमाणपृथक्त्व संयोग विभाग-परत्वापरत्वद्रवत्व-संस्कारा एकादश गुणाः तेजस। स्पर्शसङ्ख्यापरिमाणपृथक्त्व-संयोगविभागपरत्वापरत्वसंस्कारा नव गुणाः वायो। शब्द सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागा षड् गुणाः आकाशस्य। सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः पञ्च गुणाः कालदिशो। सङ्ख्या परिमाणपृथक्त्व-संयोगविभाग बुद्धिसुख दुःखेच्छाद्वेषप्रयत्न-धर्माधर्मसंस्काराः चतुर्दश गुणा आत्मन। सङ्ख्यापरिमाण-पृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारा अष्टौ गुणा मनसः। ज्ञानेच्छा-कृति-सङ्ख्यादिपञ्चकम् अष्टौ गुणाः ईश्वरस्य। तथा च,—

'वायोर्नवैकादश तेजसो गुणाः जलक्षितिप्राणभृतां चतुर्दश।
दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव च॥'

तत्र पृथिवीजलतेजोवायवो द्विविधाः, परमाणव सावयवाश्च। आकाशकालात्मदिशो विभुरूपाः। मन परमाणुरूपम्। तत्र सावयवा अनित्या, इतराणि नित्यानि, साव-

---

(५) द्रव्यत्वं संयोगविभागसमवायिकारणताऽवच्छेदकतया, गुणत्वं गुणपदशक्यताऽवच्छेदकतया, कर्मत्वं चलतीत्यनुगतप्रत्ययविषयतया च सिद्धम्।

(६) उपाधय अखण्डधर्मा।

यवा अपि त्रिविधाः, शरीरेन्द्रियविषयभेदात्। मानुषं शरीरं पार्थिवं, जलीयं शरीरं वरुणलोके प्रसिद्ध, तैजसं शरीरमादित्यलोके, वायवीयं शरीर वायुलोके। घ्राणेन्द्रियं पार्थिवं, रसनेन्द्रियं जलीयं, चक्षुरिन्द्रियं तैजसं, त्वगिन्द्रियं वायवीयं, श्रोत्रेन्द्रियं कर्णशष्कुल्यवच्छिन्ननभःप्रदेशः; एतानि पञ्च वहिरिन्द्रियाणि; मनोऽन्तरिन्द्रियं, तेन षड़िन्द्रियाणि। विषयाश्च शब्दादिरूपेण प्रसिद्धाः।

आत्मा द्विविधः, जीवात्मा परमात्मा च; तत्र जीवात्मानः प्रतिशरीरं भिन्नाः बन्धमोक्षयोग्याः। परमात्मा ईश्वरः।

अथ प्रत्यक्षाप्रत्यक्षद्रव्याणि,—परमाणुद्व्यणुके अप्रत्यक्षे, महदुद्भूतरूपवत्त्वं यत्र, तानि पृथिवीजलतेजांसि प्रत्यक्षाणि, आत्मा च प्रत्यक्षः (७)। वाय्वाकाशकालदिङ्मनांसि तु अप्रत्यक्षाणि। वहिर्द्रव्यप्रत्यक्षं प्रति महत्त्वे सत्युद्भूतरूपवत्त्वं प्रयोजकम् (८)।

अथ द्रव्योत्पत्तिप्रक्रिया, तत्रोत्पत्तिः कारणवतः; अनन्यथासिद्धनियतपूर्ववर्त्ति कारणं, तत्त्वं कारणत्वम्। त्रिविधानि कारणानि,—समवायिकारणासमवायिकारण--निमित्तकारणानि। यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणं, यथा—परमाणुः द्व्यणुकस्य, कपालं घटस्य। समवायिकारणे सम्बद्धं कारणम् असमवायिकारणं, यथा,—परमाणुद्वयसंयोगो द्व्यणुकस्य, कपालरूपं घटरूपस्य। एतदुभयभिन्नं यत् कारणं तत् निमित्तकारणं, यथा—द्व्यणुके ईश्वरः, घटे दण्डः। एतत्कारणत्रयं

---

(७) प्रत्यक्षाणि वहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयाणि। प्रत्यक्षः मानसप्रत्यक्षः, मानसप्रत्यक्षनिरूपितलौकिकविषयताश्रय इत्यर्थः।

(८) महत्त्वं परमाणुद्व्यणुकवारणाय। उद्भूतत्वं घ्राणादिवारणाय। रूपवत्त्वं वायुवारणाय।

भावकार्य्यमात्रस्य। तत्र समवायिकारणं द्रव्यमेव। असमवायिकारणं द्रव्ये गुणः, गुणे गुणः कर्म च (८)। कार्य्यमात्रं प्रति साधारणकारणानि,—ईश्वरः, तज्ज्ञानेच्छाकृतयः, प्रागभावकालदिगदृष्टानि। तत्र परमाणुद्वयसंयोगात् द्व्यणुकमुत्पद्यते, संयुक्तद्व्यणुकत्रयात्त्रसरेणुः। एवं चतुरणुकादि कपालान्तम्; कपालद्वयसंयोगेन घटो जायते; घटस्त्वन्त्यावयवी।

अथ द्रव्ये प्रमाणं कथ्यते—प्रत्यक्षद्रव्ये प्रत्यक्षमेव प्रमाणम्; अतीन्द्रियेऽनुमानम्। तत् पक्षहेतुसाध्यदृष्टान्तज्ञानसाध्यम्। विशेषो वक्ष्यते। परमाणुद्व्यणुकानुमानं यथा,—त्रसरेणुः सावयवद्रव्यारब्धः वहिरिन्द्रियवेद्यद्रव्यत्वात्, वहिरिन्द्रियवेद्यद्रव्यं यत्, तत् सावयवद्रव्यारब्धं, यथा घटः; अत्र त्रसरेणुः पक्षः, सावयवद्रव्यारब्धत्वं साध्यं, वहिरिन्द्रियवेद्यद्रव्यत्वादिति हेतुः (१०), घटो दृष्टान्तः, अनेन द्व्यणुकं परमाणुश्च सिध्यति।

आकाश-वायू शब्देन स्पर्शेन चानुमीयेते, शब्दो द्रव्याश्रितः, गुणत्वात्, यथा घटरूपम्, अनेन द्रव्यान्तरबाधात् शब्दाश्रयत्वेनाकाशं सिध्यति (११)। पृथिव्यादित्रयावृत्तिरयं स्पर्शो द्रव्याश्रितः, गुणत्वादित्यनुमानेन द्रव्यान्तरबाधात् स्पर्शाश्रयत्वेन वायुः सिध्यति।

काले प्रमाणं यथा,—परत्वापरत्वे द्विविधे, कालिके दैशिके

---

(८) गुणः अवयवसंयोगादिः। गुणे कार्य्यस्य गुणे शुक्लरूपादौ, गुणः समवायिकारणस्य गुणः शुक्लरूपादिः। कर्म क्रिया, संयोगविभागयोरसमवायिकारणमित्यर्थः।

(१०) मनोवेद्यात्मनि व्यभिचारवारणाय वहिःपदम्। रूपत्वादौ व्यभिचारवारणाय द्रव्यपदम्।

(११) अन्यत्रासम्भवेन परिशेषात् सिद्धिः।

च। परत्वोत्पत्तिश्च बहुतररविक्रियाविशिष्टशरीरज्ञानात्, अपरत्वोत्पत्तिश्च स्वल्पतररविक्रियाविशिष्टशरीरज्ञानात्; तत् परत्वं ज्येष्ठत्वम्, अपरत्वं कनिष्ठत्वम्; तदनुमानं यथा,—परत्वजनकं बहुतररविक्रियाविशिष्टशरीरज्ञानमिदं (१२) परम्परासम्बन्धघटकसापेक्षं, साक्षात्सम्बन्धाभावे सति विशिष्टज्ञानत्वात्, लोहितः स्फटिक इति प्रत्ययवत्; परम्परासम्बन्धश्च स्वसमवायिसंयुक्तसंयोगः (१३), तेन सम्बन्धघटकः कालः सिध्यति।

ननु कालस्य भूतभविष्यद्वर्त्तमानभेदेन बहुत्वात् कुत एकत्वमिति चेन्न; उपाधिभेदेन भेदप्रत्ययात् कालोपाधयो रविक्रियादिरूपा भिन्ना एव।

एवं दैशिकपरत्वापरत्वाभ्यां दिशः सिद्धिः, ते च दूरत्वसमीपत्वे। अवधिसापेक्षबहुतरसंयोगविशिष्टशरीरज्ञानमिदं परत्वजनकं परम्परासम्बन्धघटकसापेक्षमित्यादि पूर्ववत्; तेन च दिशः सिद्धिः (१४)। न चाकाशमेव सम्बन्धघटक-

---

(१२) शरीरविशेष्यकं दिनादिरूपरविक्रियाविशिष्टज्ञानं पक्षः।

(१३) स्वा रविक्रिया, तत्समवायी रविः, तत्संयुक्तः कालः, तत्संयोगोऽस्मदादौ।

(१४) अवधिसापेक्षेति।—यथा प्रयागात् काशीतो गया परा। गयातः काशी अपरेति। अत्राद्ये अवधिः काशी, तदपेक्षया प्रयागावधिकबहुतरसंयोगवत्त्वं गयायाम्। द्वितीयेऽवधिर्गया, तदपेक्षया प्रयागावधिकाल्पतरसंयोगवत्त्वं काश्याम्। न च प्रयागप्रतियोगिकबहुतरसंयोगा गयायां, न वा प्रयागसंयुक्तदेशीयाः, किन्तु प्रयागावधिकाः काश्यपेक्षया बहुतरा ये मध्यवर्त्तिदेशसंयोगास्तत्त्वं, तच्च न साक्षात्, किन्तु तावत्समवायिसंयुक्तत्वरूपपरम्परयेति तावत्समवायिदिक्सिद्धिः। न च प्रयागसमीपवर्त्तिन्यपि तादृशयावत्संयोगाश्रयदिक्संयोगस्य सत्त्वात् परत्वापत्तिः, प्रयागावधिका ये काश्यपेक्षया बहुतराः संयोगास्तदन्तःपाती तद्देशप्रतियोगिकसंयोगोऽपीति तत्प्रतियोगिकसंयोगस्य तस्मिन् साक्षात् परम्परया चानङ्गीकारात्।

मास्तामिति वाच्यं, तस्य शब्दाश्रयत्वेनैव धर्मिग्राहकप्रमाणसिद्धत्वात् न रविक्रियाद्युपनायकत्वसम्भवः (१५)।

“अहं सुखी” इत्यादिप्रत्यक्षमात्मनि प्रमाणम्। ईश्वरे चानुमानं यथा,—क्षितिः सकर्तृका, कार्यत्वात्, घटवत् (१६)। तेनेश्वरस्य तद्वृत्तिनित्यज्ञानेच्छाकृतीनां तत्सार्वज्ञस्य च सिद्धिः। मनसि प्रमाणं यथा,—सुखादिप्रत्यक्षमिन्द्रियजन्यं, जन्यप्रत्यक्षत्वात्, घटप्रत्यक्षवत्, तथा चेन्द्रियान्तरबाधे मनसः सिद्धिः।

अथ द्रव्यनाशप्रक्रिया—द्रव्यनाशो द्विविधः, क्वचिदसमवायिकारणनाशात्, क्वचित् समवायिकारणनाशाच्च। तत्राद्यो यथा,—परमाणुद्वयसंयोगनाशात् द्व्यणुकनाशः। द्वितीयो यथा,—कपालनाशाद्घटनाशः, घटनाशः उभयतः सम्भवति (१७)।

आकाशकालदिगात्मपरमाणवोऽवृत्तयः, समवायश्च। पृथिव्यादिपञ्चानां भूतत्वं, पृथिवीजलतेजोवायुमनसां क्रियावत्त्वमूर्त्तत्वे (१८)। पृथिव्यप्तेजोवायवो द्रव्यसमवायिकारणानि।

---

(१५) धर्मिण आकाशस्य ग्राहक यत् प्रमाणं पूर्वोक्तशब्दपक्षकानुमितिः शब्दाश्रयत्वेन तुल्यवित्तिवेद्यतया तद्विषयत्वादित्यर्थः। तेषां सम्बन्धघटकत्वे हिमवत्यपि विन्ध्यवत्त्वप्रतीत्यापत्तिः, कालदिशोस्तु यत्सम्बन्धघटकत्वेन सिद्धिस्तद्विशिष्टबुद्धिमात्रनियामकत्वेन अनतिप्रसङ्गात्। रविक्रियाद्युपनायकत्वं रविक्रियोपनीतभानविषयत्वम्।

(१६) क्षितिः द्व्यणुकमित्यर्थः, तेन क्षितित्वसामानाधिकरण्येन सकर्तृकत्वसाधने सिद्धसाधनम्, अवच्छेदकावच्छेदेन तत्साधने बाधः पटादौ कुविन्दादिकर्तृकत्वस्य सिद्धेः, नित्ये परमाण्वादौ च सकर्तृकत्वस्य अभावादिति प्रत्युक्तम्। प्रागभावप्रतियोगित्वे सति ध्वंसप्रतियोगित्वं कार्यत्वं, तेन ध्वंसे न व्यभिचारः।

(१७) उभयतः समवायिकारणनाशात् असमवायिकारणनाशाच्च। द्व्यणुकनाशस्तु न तथा तत्समवायिकारणस्य परमाणोर्नित्यत्वात्।

(१८) बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं भूतत्वम्। क्रियासमवायिकारणतावच्छेदकतया सिद्धो जातिविशेषो मूर्त्तत्वम्।

कालस्य कालिकसम्बन्धेन सर्वाधिकरणत्वम् । दिशो दैशिकसम्बन्धेन सर्वाधिकरणत्वम् । इति द्रव्यनिरूपणम् ।

अथ गुणाः कथ्यन्ते,—रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्विंशतिगुणाः । अत्र रूपत्वादीनि सर्वाण्येव जातयः । रूपं पृथिवीजलतेजोवृत्ति, तच्च शुक्लकृष्णरक्तपीतचित्रादिभेदेन * बहुविधं पृथिवीवृत्ति । अभास्वरशुक्लरूपं जलवृत्ति । शुक्लभास्वरं † तेजोवृत्ति । रसः पृथिवीजलवृत्तिः, तत्र मधुरलवणकटुतिक्ताम्लकषायभेदात् षड्विधः रसः पृथिव्याम् । जले मधुर एव रसः । गन्धो द्विविधः,—सुरभिरसुरभिश्च पृथिवीमात्रवृत्तिः । स्पर्शः पृथिव्यादिचतुष्टयवृत्तिः, स च त्रिविधः,—शीतः उष्णश्च अनुष्णाशीतश्च । अनुष्णाशीतस्पर्शो वायुपृथिव्योः, ‡ जले शीतः, तेजसि उष्णः ।

सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः नव द्रव्यवृत्तयः । परत्वापरत्वे पृथिवीजलतेजोवायुमनोवृत्तिनी । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नभावनाधर्माधर्मा आत्मवृत्तयः । गुरुत्वं पृथिवीजलवृत्ति । द्रवत्वं पृथिवीजलतेजोवृत्ति ; तत् द्विविधं, नैमित्तिकं सांसिद्धिकञ्च ; आद्यं पृथिवीतेजसोः, द्वितीयं जले । स्नेहो जलमात्रवृत्तिः । संस्कारः पृथिवीजलतेजोवाय्वात्ममनोवृत्तिः, स त्रिविधः,—वेगः भावना स्थितिस्थापकश्च । तत्र वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः ; द्वितीय आत्मवृत्तिः ; तृतीयः पृथिव्यादिचतुष्टयवृत्तिः ।

---

* शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात् सप्तविधं पृथिव्याम् इति क० सं० पु० पाठः ।

† स्वच्छशुक्लम् इति सोसाइटीपुस्तकपाठः ।

‡ पृथिवीवायोः इति क० सं० पु० पाठः ।

शब्दो द्विविधः,—ध्वन्यात्मकः वर्णात्मकश्च आकाशमात्रवृत्तिः ।

रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना विशेषगुणाः । सङ्ख्यापरिमाणपृथक्त्व-संयोग-विभाग-गुरुत्व-नैमित्तिकद्रवत्व-वेगस्थितिस्थापकाः सामान्यगुणाः ।

अथ नित्यगुणाः,—जलतेजोवायुपरमाणूनां विशेषगुणाः परमाणुवृत्तिस्थितिस्थापकश्च, विभूनां परमाणूनाञ्च एकत्वपरिमाणपृथक्त्वानि, ईश्वरेच्छाज्ञानकृतयश्च नित्यगुणाः । अथाप्रत्यक्षगुणाः,—गुरुत्वधर्माधर्मभावनास्थितिस्थापकाः, परमाणुद्व्यणुकवृत्तिगुणाः, अतीन्द्रियवृत्तिसामान्यगुणाः, त्रसरेणोः रूपं विहाय अन्ये गुणाः अतीन्द्रियाः ।

रूपरसगन्धस्पर्शस्नेहप्रत्यक्षे महद्वृत्तित्वे सति उद्भूतत्वं प्रयोजकम्; सामान्यगुणप्रत्यक्षे तु आश्रयप्रत्यक्षं; बुद्धिप्रत्यक्षे स्ववृत्तिविशिष्टज्ञानत्वं, सुखादिप्रत्यक्षे स्ववृत्तिसुखत्वादिकमेव (१९) । अन्त्याद्यशब्दौ विहाय सर्वः शब्दः प्रत्यक्षः ।

अथ गुणोत्पत्तिप्रक्रिया,—अवयववृत्तिविशेषगुणाः अवयविनि स्वसमानजातीयगुणान् (२०) आरभन्ते । पृथिवीविशेषगुणाः पाकजाः, ते द्विविधाः,—पाकप्रयोज्याः पाकजन्याश्च । कारणगुणप्रक्रमजन्याः पाकप्रयोज्याः, अग्निसंयोगजन्याः

तथा चोक्तम् ।—रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः ।
बुद्ध्यादिर्भावनान्तश्च शब्दो वैशेषिको गुणः ॥

इति सोसाइटीपुस्तके अतिरिक्तः पाठः ।

---

(१९) प्रयोजकमित्यर्थः ।

(२०) स्ववृत्तिरूपत्वादिव्याप्यजातिमतो गुणान् ।

द्वितीयाः । "श्यामघटे अग्निसंयोगेन श्यामरूपनाशानन्तरं घटे रक्तं रूपमुत्पद्यते" इति नैयायिकमतम् । "अग्निसंयोगेन परमाणौ पाके सति परमाणुषु रक्तरूपमुत्पद्यते, पुनर्घटोत्पत्तौ सत्यां कारणगुणप्रक्रमेण घटे रक्तरूपमुत्पद्यते" इति वैशेषिकमतम् । कपालं नीलमेकम्, एकञ्च पीतं यदि, तदा घटे चित्ररूपमुत्पद्यते । रसादावेवं सति अवयविनि रसो न जायते, चित्ररसाद्यस्वीकारात् । गुरुत्वस्थितिस्थापकयोश्च कारणगुणप्रक्रमजन्यता । द्वित्वादयोऽपेक्षाबुद्धिजन्याः (२१) । परिमाणं चतुर्विधम्,—अणु, महत्, ह्रस्वं, दीर्घञ्च । कारणगुणप्रक्रमजन्यं स्वावयवबहुत्वं महत्त्वजनकं, यथा त्रसरेणूनाम्; अवयवानां शिथिलः (२२) संयोगः प्रचयोऽपि तज्जनकः यथा तूलस्य परिमाणम् ।

पृथक्त्वं कारणगुणप्रक्रमजन्यम् । ननु तत्र किं प्रमाणम् ? घटात् पटः पृथगिति प्रत्यक्षं, तस्यान्योऽन्याभावविषयकत्वमिति चेन्न, अन्योऽन्याभावप्रत्यये प्रतियोग्यनुयोगिनोः समानविभक्तिकत्वनियमात्, यथा घटो न पट इति । अन्योऽन्याभावस्य पृथक्त्वरूपत्वे घटात् पटो नेत्यपि प्रयोगापत्तेः । न चैवं, घटादन्यः पट इत्यत्र कथमन्योऽन्याभावप्रतीतिरिति वाच्यम्, अन्यत्वस्यापि पृथक्त्वरूपत्वात् ।

संयोगस्त्रिविधः (२३),—अन्यतरकर्मजः, उभयकर्मजः, संयोगजश्च । आद्यो यथा,—मनःकर्मणा आत्ममनसोः संयोगः ।

---

(२१) नानैकत्वावगाहिनी बुद्धिरपेक्षाबुद्धिः ।

(२२) किञ्चिदवयवानवच्छिन्नत्व शिथिलत्वम् । वस्तुतः शिथिलत्वं जातिविशेषः ।

(२३) संयोगविभागयोरनपेक्षकारणं कर्मेति सूत्रम् ।

द्वितीयो यथा,—मेषयोः कर्मणा तयोः संयोगः। तृतीयो यथा,—कारणाकारणसंयोगात् कार्य्याकार्य्यसंयोगः, यथा,—हस्ततरुसंयोगात् कायतरुसंयोगः।

विभागोऽपि त्रिविधः,—अन्यतरकर्मजः, उभयकर्मजः, विभागजश्च। आद्यो यथा—मनःकर्मणा आत्ममनसोर्विभागः। द्वितीयो यथा,—मेषयोः कर्मणा तयोर्विभागः। विभागजविभागो द्विविधः, कारणमात्रविभागजः, कारणाकारणविभागजश्च। आद्यो यथा,—कपालकर्मणा कपालद्वयविभागः, ततः कपालद्वयसंयोगनाशः, ततो घटनाशः, ततः कपालस्याकाशादिदेशाद्विभागजो विभागः। न च विभागः स्वोत्पत्त्यनन्तरमेव विभागजविभागं जनयत्विति वाच्यं, द्रव्यनाशसहकृतस्यैव तस्य तज्जनकत्वात्, तत्र द्रव्यस्य प्रतिबन्धकत्वेन सति द्रव्ये तदसम्भवात् (२४)। न च कर्म्मैव एकदा कपालद्वयविभागमाकाशकपालविभागञ्च जनयत्विति वाच्यं, यत् द्रव्यानारम्भकसंयोगविरोधिनं विभागमारभते, न तत् द्रव्यारम्भकसंयोगविरोधिनम्, अन्यथा विकसत्कमलकुद्मलदलकर्मण्यतिव्याप्तिः (२५)। न च संयोगेऽप्येवमस्तु, तत्र अविरोधात्। द्वितीयस्तु कारणाकारणविभागात् कार्य्याकार्य्यविभागः, यथा,—करतरुविभागात् कायतरुविभागः। परत्वापरत्वोत्पत्तिः कालप्रकरणे उक्ता।

---

(२४) विभागजविभागासम्भवात्।

(२५) विकसत्कमलकुद्मलभङ्ग एव विपक्षबाधकस्तर्कः। इदञ्च वैशेषिकमतम्। नैयायिकनये तु कर्मणो वैलक्षण्येन दलकर्मणोऽतथात्वेऽपि कपालकर्मणस्तथात्वे बाधकाभावात् कारणमात्रविभागजविभागस्वीकारात्। कपालकर्म द्रव्यानारम्भकसंयोगविरोधिविभागाजनकं द्रव्यारम्भकसंयोगविरोधिविभागजनकत्वादिति व्यतिरेकानुमाने च वैजात्यमुपाधिरिति रहस्यम्।

बुद्धिर्ज्ञानम्; तद्द्विविधं,—स्मरणमनुभवश्च। स्मरणमपि द्विविधं,—यथार्थमयथार्थञ्च। तद्वति तत्प्रकारकत्वं यथार्थत्वं (२६). तदभाववति तत्प्रकारकत्वमयथार्थत्वम्। पूर्वानुभवः संस्कारद्वारा स्मरणं जनयति, तत्र पूर्वानुभवस्य यथार्थत्वायथार्थत्वाभ्यां स्मरणमपि उभयरूपं भवति। अनुभवो द्विविधः,—प्रमा अयथार्थश्च। तत्र प्रमा चतुर्विधा, सा वक्ष्यते। अयथार्थज्ञानं चतुर्विधं,—संशयः, विपर्य्ययः, स्वप्नः, अनध्यवसायश्चेति। संशयो यथा,—समानधर्मवद्धर्मिज्ञानविशेषादर्शनकोटिद्वयस्मरणैरयं स्थाणुर्वा पुरुषो वेति ज्ञानं जन्यते, स एव संशयः। विपर्य्ययस्तु—समानधर्मवद्धर्मिज्ञानविशेषादर्शनैककोटिस्मरणैः शुक्ताविद रजतमिति ज्ञानं जन्यते। तत्र गुरुमते इदमित्यनुभवात्मकं ज्ञानं, रजतमिति स्मरणात्मकम्; तेन ग्रहणस्मरणात्मक ज्ञानद्वयं, न तु रजतत्वविशिष्टज्ञानमिदम्, अन्यस्यान्यथाभानसामग्र्यभावात्। प्रवृत्तिश्च स्वतन्त्रोपस्थितेष्टभेदाग्रहात्। नैयायिकमते प्रवर्त्तकं * विशिष्टज्ञान, तेन भ्रम. सिध्यति। स्वप्नस्तु अनुभूतपदार्थस्मरणैरदृष्टेन धातुदोषेण च जन्यते। अनध्यवसायश्च किञ्चिदिति ज्ञानं विशेषादर्शनाद्भवति। अत्र, 'यदि अयं निर्वह्निः स्यात्तदा निर्धूमः स्यात्' इति तर्को विपर्य्ययमध्ये बोध्यः। तत्र नैयायिकमते स्वप्नानध्यवसायौ विपर्य्ययमध्ये प्रविष्टौ; तेन तन्मते अयथार्थज्ञानं द्विविधं,—संशयो विपर्य्ययश्चेति।

सुखं धर्मजन्यम्। दुःखमधर्मजन्यम्। इच्छा इष्टसाधनता-

---

(२८) विशेष्यत्वं सप्तम्यर्थः, तस्य च निरूपितत्वसंसर्गेण तत्प्रकारकत्वेऽन्वयः, तथा च तद्विशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपकत्वं ज्ञानेच्छाकृतिनिष्ठं यथार्थत्वम्।

---

* प्रवर्त्तकम् एकम् इति ए० सो० पु० पाठः।

ज्ञानजन्या । द्वेषोऽनिष्टसाधनत्वज्ञानजन्यः । कृतिस्त्रिविधा,—जीवनयोनियत्नरूपा, प्रवृत्तिः, निवृत्तिश्च । आद्या जीवनादृष्टजन्या, द्वितीया इच्छाजन्या, तृतीया द्वेषजन्या । धर्मः श्रुतिविहितकर्मजन्यः । अधर्मः श्रुतिविरुद्धाचरणजन्यः । वेगाख्यः संस्कारः आद्यक्रियाजन्यः द्वितीयादिक्रियाजनकः, यथा,—वेगेन वाणश्चलतीति । भावनाख्यः संस्कारो विशिष्टज्ञानजन्यः । स्थितिस्थापकाख्यः संस्कारः कारणगुणप्रक्रमजन्यः । गुरुत्वं कारणगुणप्रक्रमजन्यम् । नैमित्तिकं द्रवत्वं जतुघृतद्रुतसुवर्णादीनामग्निसंयोगजन्यम् । स्नेहः कारणगुणप्रक्रमजन्यः । शब्दस्त्रिविधः,—संयोगजः, विभागजः, शब्दजश्च ; आद्यो भेरीदण्डसंयोगजन्यः, द्वितीयो वंशादिदलद्वयविभागजन्यः, तृतीयस्तु संयोगेन विभागेन च आद्ये शब्दे जनिते तेन शब्देन निमित्तवायुसहकृतेन वीचितरङ्गन्यायेन कदम्बगोलकन्यायेन वा जन्यते इति गुणनिरूपणम् ।

उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्म्माणि । उत्क्षेपणत्वादीनि जातयः । पृथिवी-जल-तेजो-वायु-मनोवृत्तीनि कर्म्माणि सर्वाणि अनित्यानि ; अतीन्द्रियवृत्तीनि अतीन्द्रियाणि, प्रत्यक्षवृत्तीनि प्रत्यक्षाणि । अथ कर्म्मप्रक्रिया,—संयोगेन नोदनाख्येनाद्यं कर्म्म जन्यते, द्वितीयादि वेगजन्यम् । क्रियातो विभागः, विभागात् पूर्वसंयोगनाशः, ततः उत्तरदेशसंयोगोत्पत्तिः. ततः कर्मविभागयोर्नाशः इति कर्म्मनिरूपणम ॥

सामान्यं त्रिविधं,—व्यापक, व्याप्यं, व्याप्यव्यापकञ्च । व्यापकं सत्ता, व्याप्यं घटत्वादि, द्रव्यत्वादि व्याप्यव्यापकम् ।

"व्यक्तेरभेदस्तुल्यत्व सङ्करोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ॥"

नित्यत्वे सत्यनेकसमवेतत्वमिति सामान्यलक्षणम् ।

सामान्यानि नित्यान्येव, अतीन्द्रियवृत्तीनि अतीन्द्रियाणि, प्रत्यक्षवृत्तीनि प्रत्यक्षाणि ॥

नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः । ते च बहवो नित्या अतीन्द्रियाश्च । प्रलये परमाणूनां भेदाय ते स्वीक्रियन्ते, तेषां वैधर्म्यव्याप्यत्वादिति ।

स्वसम्बन्धिभिन्नो नित्यः सम्बन्धः समवायः, तेन स्वरूपसम्बन्धस्य संयोगस्य च निरासः । 'इह घटे घटत्वम्' इति प्रतीतिस्तत्र प्रमाणम् । नैयायिकमते समवायः प्रत्यक्षः, स च एको नित्यश्च ।

ननु अन्यान्यपि अन्धकारसुवर्णादीनि द्रव्याणि सन्ति, आलस्यादयो गुणा अपि सन्ति, कथं नवैवेत्यादि ? मैवम्, अन्धकारो न द्रव्यं, किन्तु तेजोऽभावः । सुवर्णं तेज एव । आलस्यं कृत्यभाव एव । एवमन्यदपि बोध्यम् ।

अभावो द्विविधः,—संसर्गाभावोऽन्योऽन्याभावश्च । आद्यस्त्रिविधः,—प्रागभावः, ध्वंसः, अत्यन्ताभावश्च । प्रागभावो विनाशी अजन्यः । ध्वंसो जन्यः अविनाशी च । अत्यन्ताभावान्योऽन्याभावौ त्वजन्यौ अविनाशिनौ । योग्यानुपलब्ध्या अभावः प्रत्यक्षः ; अन्यत्र तु अतीन्द्रियः ।

अथ प्रमा कथ्यते, सा चतुर्विधा,—प्रत्यक्षानुमित्युपमितिशाब्दभेदात् ; तत्करणानि प्रमाणानि चत्वारि,—प्रत्यक्षानुमानोपमानशब्दभेदात् । तत्र प्रत्यक्षं द्विविधं,—निर्विकल्पकं, सविकल्पकञ्च । प्रत्यक्षकरणानि षडिन्द्रियाणि,—घ्राण-रसन-चक्षुस्त्वक्-श्रोत्र-मनांसि । एतानि सन्निकर्षसहितानि प्रत्यक्षं जनयन्ति । सन्निकर्षश्च लौकिकोऽलौकिकश्च, अलौकिकस्त्रिविधः,—ज्ञानलक्षणा, सामान्यलक्षणा, योगजश्च । लौकिकः षड्विधः,—संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः,

समवायः, समवेतसमवायः, विशेषणता चेति। संयोगेन द्रव्यग्रहः, संयुक्तसमवायेन शब्दान्यगुणकर्मद्रव्यवृत्तिजातीनां प्रत्यक्षं, संयुक्तसमवेतसमवायेन शब्दमात्रवृत्तिजातीतर-गुणवृत्तिकर्मवृत्तिजातीनां प्रत्यक्षं, समवायेन शब्दस्य, समवेतसमवायेन शब्दवृत्तिजातीनां, विशेषणतया अभावस्य, समवायस्य च प्रत्यक्षम्।

अलौकिकः स यथा,—ज्ञानलक्षणया 'सुरभि चन्दनम्' इति चाक्षुषं ज्ञानम्, सामान्यलक्षणया घटत्वेन रूपेण यावद्घटज्ञानम्; योगजधर्मेण योगिनां सर्वज्ञानम्। तत्र निर्विकल्पकं विशेष्यप्रकारादिसहितं वस्तुस्वरूपमात्रज्ञानं, सविकल्पकं सप्रकारकम्। भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं, यथा,—'अयं घटः' इत्यत्र अय विशेष्यः, घटत्वं प्रकारः भासमानवैशिष्ट्यं, तयोः समवायः, तस्य प्रतियोगि घटत्वम्। सविकल्पकमेव विशिष्टवैशिष्ट्यज्ञानम्, यथा,—'अयं दण्डी' इत्यत्र दण्डत्वविशिष्टस्य वैशिष्ट्यं पुरुषे भासते। अथ प्रक्रिया, आदौ इन्द्रियसन्निकर्षात् 'घट-घटत्वे' इति निर्विकल्पकं, ततः 'अयं घटः' इति विशिष्टज्ञानम्।

तत्र 'परतः प्रामाण्यग्रहः' इति नैयायिकाः, यथा,—आदौ 'घटः' इति व्यवसायः, ततः 'घटमहं जानामि' इत्यनुव्यवसायः, ततः 'प्रामाण्याप्रामाण्ये' इति कोटिद्वयस्मरणम्; अथ चतुर्थे 'इदं ज्ञानं प्रमा ? न वा ?' इति प्रामाण्यसंशयः, ततो विशेषदर्शनानन्तरं प्रामाण्यग्रहः,—इदं ज्ञान प्रमा, समर्थप्रवृत्तिजनकत्वात् ज्ञानान्तरवत्। स्वतः प्रामाण्यग्रहः इति त्रयो मीमांसकाः, तत्र गुरुमते,—'अयं घटः' इति ज्ञानं विषयम्, आत्मानं, ज्ञानप्रामाण्यञ्च गृह्णाति। मुरारिमिश्रमते,—'अय घटः' इति ज्ञानानन्तरं घटमह जानामीत्यनुव्यवसायः, तेनैव प्रामाण्यग्रहः। भट्टमते,—ज्ञानस्यातीन्द्रियत्वेन ज्ञानमनुमेय यथा,

तथा तद्वृत्ति प्रामाण्यञ्च, तथा हि 'अयं घटः' इति ज्ञानानन्तरं घटे ज्ञातता उत्पद्यते, ततो 'ज्ञातो मया घटः' इति ज्ञाततापत्यक्षं, ततो व्याप्यादिप्रत्यक्षानन्तरं ज्ञानानुमानम्; यथा,—अहं घटत्वप्रकारकज्ञानवान् घटत्वप्रकारकज्ञाततावत्त्वात्, तावतैव तस्य धर्मधर्मिविषयकत्वेन प्रामाण्यानुमानम् इति प्रत्यक्षनिरूपणम्।

अनुमितिकरणमनुमानम्, अनुमितित्वं जातिः, व्यापारवत् कारणं करणं, व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकः। हेतुज्ञानादि करणं, परामर्शो व्यापारः। परामर्शश्च व्याप्तिविशिष्टपक्षधर्मताज्ञान, यथा, 'वह्निव्याप्यधूमवानयम्' इति। आदौ महानसादौ धूमे वह्निसामानाधिकरण्यग्रहे सति 'धूमो वह्निव्याप्यः' इत्यनुभवो जायते, ततः कालान्तरे पर्वते धूमे दृष्टे सति व्याप्तिस्मरणं, ततश्च व्याप्तिविशिष्टवैशिष्ट्यज्ञानं 'वह्निव्याप्यधूमवानयम्' इति तृतीयलिङ्गपरामर्शः। पक्षतासहितेन तेन 'पर्वतो वह्निमान्' इत्यनुमितिर्जन्यते।

व्याप्तिश्च हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम्। न च 'अयं संयोगवान् द्रव्यत्वात्' इत्यत्र अव्याप्तिः, प्रतियोगिव्यधिकरणहेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यमित्यर्थात् *। पक्षता च सिषाधयिषाविरहसहकृतसिद्ध्यभावः।

अनुमानं द्विविधं,—स्वार्थं परार्थञ्च। तत्र परार्थं पञ्चावयवसाध्यम्, अवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि; यथा,—अयं वह्निमान् (१), धूमात् (२), यो यो धूमवान् स स वह्निमान्, यथा महानसम् (३), वह्निव्याप्यधूमवान् अयम् (४)

---

* 'न च इत्यादि 'इत्यर्थात्' इत्यन्त. पाठः क० स० पुस्तके नास्ति।

तस्मात् वह्निमान् (५) इति। स्वार्थञ्च स्वीयव्याप्त्यादिज्ञानसाध्यं, न तत्र परप्रतिपत्त्यर्थमेवम् आह शब्दप्रयोगम्।

तच्चानुमानं त्रिविधं,—केवलान्वयि-केवलव्यतिरेकि-अन्वयव्यतिरेकिभेदात्। यत्र साध्यव्यतिरेको न कुत्राप्यस्ति, स केवलान्वयी, यथा,—'घटोऽभिधेयः प्रमेयत्वात्' इत्यत्र अभिधेयत्वस्य साध्यस्य व्यतिरेको न कुत्राप्यस्ति *। यत्र साध्यप्रसिद्धिः पक्षातिरिक्ते नास्ति, स केवलव्यतिरेकी, यथा,—'पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात्', यत्र इतरभेदाभावः तत्र पृथिवीत्वाभावः, यथा जलादौ। व्यतिरेकव्याप्तौ तु साध्याभावो व्याप्यः, हेत्वभावो व्यापकः। यत्र साध्यं साध्याभावश्चान्यत्र प्रसिद्धः, सोऽन्वयव्यतिरेकी, यथा—'पर्वतो वह्निमान् धूमात्' इति। अन्वयव्यतिरेकिणि हेतौ अवश्यं पञ्चरूपोपपन्नता अपेक्षणीया,—पक्षवृत्तित्वं, सपक्षसत्त्वं, विपक्षव्यावृत्तत्वम्, अबाधितत्वम्, असत्प्रतिपक्षितत्वञ्चेति पञ्च रूपाणि। केवलान्वयिनि विपक्षव्यावृत्तत्वरहितं, केवलव्यतिरेकिणि सपक्षसत्त्वरहितं चतूरूपमेवापेक्षितम्। यत्र साध्यसन्देहः स पक्षः; यत्र साध्यनिश्चयः स सपक्षः; यत्र साध्याभावनिश्चयः स विपक्षः; साध्याभाववान् पक्षो बाधः; साध्यविरोधिसाधको हेतुः सत्प्रतिपक्षः।

सोपाधौ पक्षसपक्षसत्त्वाद्यन्यतमभङ्ग आवश्यकः; सोपाधिश्च स्वव्यभिचारितासम्बन्धेन उपाधिविशिष्टः। उपाधिश्च त्रिविधः,—साधनाव्यापकत्वे सति शुद्धसाध्यव्यापकः (१), साधनाव्यापकत्वे सति पक्षधर्मावच्छिन्नसाध्यव्यापकः (२), साधनाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकश्च (३)। आद्यो यथा,—'अयोगोलकं धूमवद्वह्नेः' अत्र आर्द्रेन्धनप्रभववह्निमत्त्वमुपाधिः

---

* व्यतिरेकाप्रसिद्धेः इति ए० सी० पु० पाठः।

साधनाव्यापकत्वे सति शुद्धसाध्यव्यापकः । द्वितीयो यथा,—'वायुः प्रत्यक्षः, प्रत्यक्षस्पर्शाश्रयत्वात्' अत्र बहिर्द्रव्यत्वावच्छिन्नस्य प्रत्यक्षत्वस्य साध्यस्य व्यापकम् उद्भूतरूपवत्त्वमुपाधिः । तृतीयो यथा,—'ध्वंसो विनाशी, जन्यत्वात्' अत्र जन्यत्वावच्छिन्नविनाशित्वव्यापकं भावत्वमुपाधिः ।

अथ हेत्वाभासाः कथ्यन्ते,—सव्यभिचार-विरुद्ध-सत्प्रतिपक्षासिद्ध-बाधिताः पञ्च हेत्वाभासाः । सव्यभिचारस्त्रिविधः,—साधारणासाधारणानुपसंहारिभेदात् ; साध्याभाववद्वृत्तित्वं साधारणत्वं, यथा,—'धूमवान् वह्नेः' । सकलसपक्षव्यावृत्तत्वम् असाधारणत्वं, * यथा,—'पर्वतो वह्निमान्, पर्वतत्वात्' । सर्वपक्षकत्वम् अनुपसंहारित्वं, यथा,—'सर्वं प्रमेयम्, अभिधेयत्वात्' । साध्याभावव्याप्तो हेतुर्विरुद्धः, यथा,—'घटो नित्यः, सावयवत्वात्' । सत्प्रतिपक्षो यथा,—'पर्वतो वह्निमान् धूमात्' 'पर्वतो वह्न्यभाववान् महानसान्यत्वात्' । असिद्धस्त्रिविधः,—आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्च । यत्र पक्षोऽसन् सिद्धसाधनं वा, स आश्रयासिद्धः, यथा,—'शशविषाणं नित्यम्, अजन्यत्वात्' 'शरीरं हस्तादिवत्, हस्तादिमत्तया प्रतीयमानत्वात्' । यत्र पक्षावृत्तिर्हेतुः स स्वरूपासिद्धः, यथा,—'पर्वतो वह्निमान्, महानसत्वात्' । स च विशेषणासिद्ध-विशेष्यासिद्ध-भागासिद्धभेदाद्बहुविधः । आद्यो यथा,—'शब्दोऽनित्यः, चाक्षुषत्वे सति जन्यत्वात्' । द्वितीयो यथा,—'शब्दोऽनित्यः, गुणत्वे सति परमाणुवृत्तित्वात्' । तृतीयो यथा,—'एतानि द्रव्याणि, निरवयवत्वात्' । सोपाधिर्व्याप्यत्वासिद्धः, यथा,—'धूमवान् वह्नेः' । बाधो यथा,—'जलह्रदो वह्निमान्, द्रव्यत्वात्' । तेन एतद्दोषरहितो हेतुः सद्धेतुः । इत्यनुमानं व्याख्यातम् ।

---

* सकलसपक्षविपक्षव्यावृत्तत्वमिति ए० सी० पु० पाठः ।

उपमितिकरणमुपमानम्। 'कीदृशो गवयः?' इति प्रश्ने 'गोसदृशो गवयः' इत्युत्तरिते यदा गोसदृशं प्राणिनं पश्यति, तदा पूर्वोक्तं वाक्यार्थं स्मरति, अनन्तरम् 'अयं गवयपदवाच्यः' इति शक्तिग्रहः, सेयमुपमितिः। इत्युपमानं व्याख्यातम्।

आप्तोक्तः शब्दः प्रमाणं, प्रकृतवाक्यार्थगोचरयथार्थज्ञानवान् आप्तः। पदज्ञानं करणं, पदार्थोपस्थितिर्व्यापारः। आकाङ्क्षा-योग्यताऽऽसत्ति-तात्पर्यज्ञानानि सहकारीणि, फलं शाब्दबोधः। स्वरूपयोग्यत्वे सति अजनितान्वयबोधकत्वम् आकाङ्क्षा, तेन 'घटः, कर्मत्वम्, आनयनं, कृतिः' इत्यत्र नान्वयबोधः, स्वरूपायोग्यत्वात्। 'अयमेति पुत्रो राज्ञः, पुरुषोऽपसार्यताम्' इत्यत्र 'राज्ञः पुरुषः' इति नान्वयबोधः, पुत्रेण जनितान्वयबोधकत्वात्। बाधकप्रमाविरहो योग्यता, तेन 'वह्निना सिञ्चति' इत्यत्र नान्वयबोधः, अयोग्यत्वात्। अव्यवधानेनान्वयप्रतियोग्युपस्थितिरासत्तिः, तेन 'गिरिर्भुक्तं वह्निमान् देवदत्तेन' इत्यत्र नान्वयबोधः। तत्तदर्थप्रतीतीच्छयोच्चरितत्वं तात्पर्यं, तेन भोजनप्रकरणादौ 'सैन्धवमानय' इत्युक्ते अश्वान्वयबोधो न भवति।

वृत्त्या विना शब्देन नान्वयबोधो जन्यते। वृत्तिर्द्विविधा,—शक्तिलक्षणा च। शक्तिः घटादिपदस्य घटादौ; लक्षणा यथा,—'गङ्गायां घोषः प्रतिवसति' इत्यत्र गङ्गापदार्थे प्रवाहे घोषान्वयानुपपत्त्या गङ्गापदस्य तीरे लक्षणा कल्प्यते, तया वृत्त्या उपस्थिते तीरे घोषः प्रतिवसतीत्यन्वयबोधो भवति। गौणी वृत्तिरपि लक्षणैव, यथा,—'अग्निर्माणवकः', 'गौर्वाहीकः' अत्र लक्षणया अग्न्यादिसादृश्यं प्रतीयते।

शक्तं पदं चतुर्विधं,—यौगिकं, रूढं, योगरूढं, यौगिकरूढञ्च। आद्यं यथा,—पाचकादिपदं योगार्थे पाककर्त्तरि

शक्तम्। द्वितीयं यथा,—विप्रादिपदं रूढ्या ब्राह्मणवाचकम्। तृतीयं यथा,—पङ्कजादिपदं योगरूढ्या पङ्कजनिकर्तृत्वेन पद्मत्वेन च पद्मवाचकम्। चतुर्थं यथा,—उद्भिदादिपदं यौगिकं तरुगुल्मादेः, रूढं यागविशेषस्य वाचकम्।

लक्षणा द्विविधा,—जहत्स्वार्थाऽजहत्स्वार्था च। आद्या यथा,—'गङ्गायां घोषः' इत्यादौ। द्वितीया यथा,—'सर्वे छत्रिणो यान्ति' इत्यादौ ; अत्र छत्रिणः तदितरस्यापि गमनान्वयः।

अथ शाब्दबोधप्रक्रिया,—'देवदत्तो ग्रामं गच्छति' इत्यत्र ग्रामकर्मक-गमनजनक-वर्त्तमानकृतिमानित्यन्वयबोधः। द्वितीयाया अर्थः कर्मत्वं, धातोर्गमनं, जनकत्वं संसर्गमर्य्यादालभ्यं, लटो वर्त्तमानत्वम्, आख्यातस्य कृतिः, तत्सम्बन्धः संसर्गमर्य्यादालभ्यः। यत्र कर्त्तरि कृतिर्बाधः, तत्र आख्यातस्य व्यापारादौ लक्षणा, यथा,—'रथो गच्छति' इत्यत्र गमनजनकवर्त्तमानव्यापारवान् रथः। 'दधि पश्यति' इत्यादौ द्वितीयालोपस्थले दधिशब्द एव अजहत्स्वार्थलक्षणया दधिकर्मत्वं बोधयति। एकवचनाद्युपस्थितमेकत्वादि सर्वत्र प्रथमादिपदमुपस्थापयति *। 'देवदत्तेन गम्यते ग्रामः' इत्यस्य देवदत्तवृत्तिकृतिजन्य गमनजन्य-फलशाली ग्राम इत्यर्थः। वृत्तित्वं संसर्गबललभ्यं, तृतीयार्थस्य कृतिः, जन्यत्वं संसर्गः, गमनं धात्वर्थः, जन्यत्वं संसर्गः, फलं कर्मात्मनेपदार्थः, शालित्वं संसर्गः। भावप्रत्यये तु 'देवदत्तेन सुप्यते' इत्यस्य देवदत्तवृत्तिकृतिजन्यः स्वाप इत्यर्थः। भावप्रत्ययस्थले फलाभावात् आत्मनेपदार्थो न भासते। भविष्यत्त्वं लृटोऽर्थः, तच्च विद्यमान-प्रागभाव-प्रतियोग्युत्पत्तिकत्वं, तेन 'गमिष्यति' इत्यत्र विद्यमानप्राग-

---

* तेन 'दधि पश्यति' इत्यादौ कर्तृपदाभावेऽपि एकवचनेन तिङा कर्तृपदमुपस्थाप्यते इति भावः। प्रथमादिपद प्रथमान्तपदमित्यर्थः।

भावप्रतियोग्युत्पत्तिकगमनानुकूलकृतिमानित्यर्थः। लुटोऽर्थः अनद्यतनत्वमपि। लुङोऽर्थः उत्पत्तिर्भूतत्वञ्च; भूतत्वमतीतत्वं, तच्चोत्पत्तौ अन्वेति, तथा च विद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वं लब्धम्। लिटोऽनद्यतनत्वं, परोक्षत्वम्. अतीतत्वञ्चार्थः, तदन्वयः पूर्ववदुत्पत्तौ। लङोऽनद्यतनत्वमतीतत्वञ्चार्थः। विधिलिङोऽर्थः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्टसाधनत्वम्; 'स्वर्गकामो यजेत' इत्यादौ कृतिसाध्य-बलवदनिष्टाजनकेष्टसाधनयागकर्त्ता स्वर्गकाम इत्यर्थः। आशीर्लिङ्लोटोरर्थः वक्त्रिच्छाविषयत्वम्; तेन 'घटमानय' इत्यत्र घटकर्मक-मदिच्छाविषयानयनानुकूलकृतिमान् त्वमित्यन्वयबोधः। व्याप्यक्रियया व्यापकक्रियाया आपादनं लृङोऽर्थः; तात्पर्य्यवशात् क्वचित् भूतत्वं. क्वचिद्भविष्यत्त्वञ्च लृङा बोध्यते।

सनः कर्त्तुरिच्छा अर्थः, सन्नुत्तराख्यातस्याश्रयत्वे लक्षणा, सविषयकार्थकप्रकृतिकाख्यातस्य आश्रयत्वे लक्षणाया 'घटं जानाति' इत्यादौ क्लृप्तत्वात्। यङोऽर्थः पौनःपुन्यं, तच्च तदानीन्तनप्रकृत्यर्थसजातीयक्रियान्तरध्वंसकालीनत्वे सति वर्त्तमानादिकृतिविषयत्वं, 'पापच्यते' इत्यादौ तादृशकालीनत्वमेव यङा प्रत्याय्यते, आख्यातस्य चरमदलवाचकत्वात् न विशिष्टवाचकत्वं यङः, तदानीन्तनत्वञ्च स्थूलकालमादाय।

पूर्वकालीनत्वं कर्त्ता च क्त्वार्थः, पूर्वत्वञ्च सन्निहितक्रियाऽपेक्षया बोध्यम्; तत्पूर्वकालीनत्वं तत्प्रागभावकालवृत्तित्वं, तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वं वा, तेन 'भुक्त्वा व्रजति' इत्यत्र गमनप्रागभावावच्छिन्नकालवृत्तिभोजनकर्त्रभिन्नो व्रजतीत्यर्थः, समानविभक्तिकताम् अभेदेन धर्मिवाचकत्वात्, अव्ययत्वेन क्त्वापरविभक्तिलोपात्। कालः तात्पर्य्यवशात् व्यवहिताव्यवहितसाधारणो बोद्धव्यः, तेन

‘पूर्वस्मिन् अब्दे गत्वाऽस्मिन्नब्दे समागतः’ इत्येतादृशप्रयोगसङ्गतिः। इच्छावान् तुमुनोऽर्थः; ‘भोक्तुं व्रजति’ इत्यस्य भोजनेच्छावान् व्रजतीत्यर्थः। ‘भोक्तुमिच्छति’ इत्यत्र तु कर्त्तरि लक्षणा, भोजनकर्त्तारमात्मानमिच्छतीत्यर्थः। ‘सविशेषणे हि’ इति न्यायात् विशेषणे कृताविच्छान्वयः।

प्रकृतधात्वर्थकर्त्ता शतृशानचोः, धात्वर्थजन्यफलवान् कर्म शानचोऽर्थः। शत्रादीनां कर्त्ता वाच्यः; सविषयार्थकप्रकृतिकानाम् आश्रयत्वे लक्षणा। एवं कर्तृकर्मकृतां तेन तेन रूपेण कर्त्ता कर्म च वाच्यम्। भावकृतान्तु नङ्घञादीनां प्रयोगसाधुत्वमात्रं, धात्वर्थातिरिक्तस्य भावकृता अनुपस्थापनादिति।

ननु ‘नीलं घटमानय’ इत्यादौ द्वितीयाद्वयश्रवणात् कर्मद्वयबोधापत्तिः, न तु विशिष्टस्य कर्मत्वमिति चेत्? न, अत्र विशेषणविभक्तिः साधुत्वार्थं, अथवा विशेषणविभक्तेरभेदोऽर्थः। अत्रायं विशेषः,—द्वितीयपक्षे वाक्यसमासयोः पर्य्यायता न घटते, वाक्ये ‘नीलं घटम्’ इत्यादौ अभेदस्य पदार्थत्वेन प्रकारत्वात् न संसर्गत्वं, ‘नीलघटम्’ इत्यादौ कर्मधारये लक्षणाया अस्वीकारेणाभेदस्यापदार्थत्वेन संसर्गत्वात्; तथा च वाक्यसमासयोः पर्य्यायानुरोधेन षष्ठीसमासे ‘राजपुरुषः’ इत्यादौ षष्ठ्यर्थसम्बन्धे लक्षणा न घटते, सम्बन्धस्य संसर्गमर्य्यादालभ्यत्वात्। वस्तुतस्तु विरुद्धविभक्त्यनवरुद्धस्य अभेदबोधकत्वव्युत्पत्तेः मुख्यार्थराजाभेदस्य बाधेन राजपदस्य राजसम्बन्धिनि लक्षणा। एवं बहुव्रीहौ चरमपदस्यान्यपदार्थे लक्षणा; तथा च द्वन्द्वकर्मधारयान्यसमासे सर्वत्र तत्तदर्थे लक्षणा।

एवं नञर्थोऽभावः, ‘अघटं भूतलम्’ इत्यादौ घटभिन्ने

लक्षणा । 'न कलञ्जं भक्षयेत्' इत्यादौ बलवदनिष्टजनके लक्षणा । क्रियासङ्गतस्य एवकारस्यात्यन्तायोगव्यवच्छेदोऽर्थः, यथा,—'नील सरोज भवत्येव' । विशेषणसङ्गतस्य अयोगव्यवच्छेदः, यथा,—'शङ्खः पाण्डर एव' इति । विशेष्यसङ्गतस्य अन्ययोगव्यवच्छेदः, यथा,—'पार्थ एव धनुर्द्धरः' इत्यादौ । एवं दिशा सर्वत्र बोध्यम् ।

इति श्रीजगदीशभट्टाचार्य्यविरचितं तर्कामृतम् ।

समाप्तोऽयं ग्रन्थः ।